ॐ गं महागणाधिपतये नमः।। ॐ ऐं महासरस्वत्यै नमः।।

# अथ सरस्वतीक्षमायाचनास्तोत्रम्

कृपां कुरू जगन्मातर्मामेव हतचेतसम्।
गुरुशापात्स्मृतिभ्रष्टं विद्याहीनं च दुःखितम्।। १।।

ज्ञानं देहि स्मृतिं देहि विद्यां विद्याधिदेवते।
प्रतिष्ठां कवितां देहि शक्तिं शिष्यप्रबोधिकाम्।। २।।

ग्रन्थकर्तृकशक्तिं च सत्शिष्यं सुप्रतिष्ठितम्।
प्रतिभां सत्सभायां च विचारक्षमतां शुभाम्।। ३।।

लुप्तं सर्वं दैववशात् तान्विभूतं पुनःकुरु।
तथाघभस्मं च यथा करोति देवता पुनः।। ४।।

ब्रह्मास्वरूपा परमा ज्योतिरूपा सनातनी।
सर्वविद्याधिदेवी या तस्यै वाण्यै नमो नमः।। ५।।

यया विना जगत्सर्वं शश्वद् जीवन्मृतं सदा।
ज्ञानाभिदेवी या तस्यै सरस्वत्यै नमो नमः।। ६।।

यया विना जगत्सर्वं मूकमृन्मद्वच्च सदा।
वागाधिष्ठातृदेवी या तस्यै वाण्यै नमो नमः।। ७।।

हिमचन्दनकुन्देन्दु कुमुदाम्भोजसन्निभाम्।
वर्णाधिदेवी या तस्यै चाक्षरायै नमो नमः।। ८।।

विसर्गबिन्दुमात्रासु यदधिष्ठानमेव च।
तदधिष्ठात्री या देवी भारत्यै ते नमोनमः।। ९।।

यया विनात्र संख्याकृत् संख्यां कर्तुं न शक्यते।
कालसंख्यास्वरूपा या तस्यै देव्यै नमो नमः।। १०।।

व्याख्यास्वरूपा या देवी व्याख्याधिष्ठातृदेवता।
भ्रमसिद्धान्तरूपा या तस्यै देव्यै नमो नमः।। ११।।

प्रज्ञाज्ञानस्मृतिमेधा प्रतिभाकल्पनाधृतिः।
विवेकस्फूर्तिशक्तिर्या तस्यै देव्यै नमोनमः।। १२।।

सनत्कुमारो ब्रह्माणं ज्ञानं पप्रच्छ यत्र वै।
बभूव जडवत्सोऽपि सिद्धान्तं कर्तुमक्षमः।। १३।।

तदा जगाम भगवान् आत्मा श्रीकृष्ण ईश्वरः।
उवाच सततं स्तोत्रं पाणिरिति प्रजापतिम्।। १४।।

स च तुष्टाव त्वां ब्रह्मा चाज्ञया परमात्मनः।
चकार त्वत्प्रसादेन तदा सिद्धान्तमुत्तमम्।। १५।।

यदाप्यनन्तं पप्रच्छ ज्ञानमेकं वसुन्धरा।
बभूव मूकवत्सोऽपि सिद्धान्तं कर्तुमक्षमः।। १६।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

तदा त्वां च स तुष्टाव संत्रस्तः कश्यपाज्ञया।
ततश्चकार सिद्धान्तं निर्मलं भ्रमभंजनम्।। १७।।

व्यासः पुराणसूत्रं च पप्रच्छ वाल्मिकं यदा।
मौनीभूतः स सस्मार त्वामेव जगदम्बिकाम्।। १८।।

तदा चकार सिद्धान्तं लद्वरेण मुनीश्वरः।
संप्राप निर्मलं ज्ञानम् प्रमादध्वंसकारणम्।। १९।।

पुराणसूत्रं श्रुत्वा स व्यासः कृष्णकुलोद्भवः।
त्वां सिषेव दध्यौ च शतवर्षं च पुष्करे।। २०।।

तदा त्वत्तोऽपरं प्राप्य स कवीन्द्रो बभूव ह।
तदा वेदविभागं च पुराणानि चकार सः।। २१।।

यदा महेन्द्रो पप्रच्छ तत्त्वज्ञानं शिवाश्विम्।
क्षणं त्वामेव संचिन्त्य तस्मै ज्ञानं ददौ विभुः।। २२।।

पप्रच्छ शब्दशास्त्रं च महेन्द्रश्च बृहस्पतिम्।
दिव्यं वर्षसहस्रं च सः त्वां दध्यौ च पुष्करे।। २३।।

तदा त्वत्तोऽपरं प्राप्य दिव्यं वर्षसहस्रकम्।
उवाच शब्दशास्त्रं च तदर्थं च सुरेश्वरम्।। २४।।

अद्यापि ये शिष्यानध्यापयन्ति च मुनीश्वराः।
ते च त्वां परिसंचिन्त्य प्रवर्तन्ते सुरेश्वरी।। २५।।

त्वं संस्तुता पूजिता च मुनीन्द्रमनुमानवैः।
दैत्येन्द्रैश्च सुरैश्चापि ब्रह्माविष्णुशिवादिभिः।। २६।।

जडीभूतः सहस्राक्षः पंचवक्त्रश्चतुर्मुखः।
यां स्तोतुं किमहं स्तौमि तामेकास्यै नमो नमः।। २७।।

।। ॐ ऐं महासरस्वतीप्रीत्यर्थं समर्पयामि।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM